Kālikā śatakam

108 versed stuti of kālikā

दस्योरस्थिकमस्तकाभरणकां कण्ठस्थमुण्डावलिं
दिक्वस्त्रावृतविग्रहामभयदां भक्तान् वरं दायिकाम्
हस्ताब्जैः सततं स्खलद्रुधिरकं मुण्डं दधानामसिं
प्रेतारूढपदां भजेहमनिशं श्रीदक्षिणाकालिकाम् । ।१

महाकालवामा स्मिताम्भोजरामा
सदा मण्डलाग्रैकमुण्डं दधाना
वराभीतिहस्ता गले मुण्डमाला
लसद्युद्धभूदानवानां कराला । ।२

त्वमत्यन्तसूक्ष्मा हृदिस्था सदैव
त्वमैश्वर्यसौन्दर्यहर्षाब्धिरूपा ।
कलानादबिन्दुस्वरूपा स्वरूपा
हतामर्त्यवृत्रा सदा पातु चित्रा । ।३

अमारात्रिवर्णा शवक्लृप्तकर्णा
सदा बिल्वपर्णार्चनापादजर्णा ।
सुधाक्षौद्रसोमाक्तगण्डौष्ठवर्णा
महाकालिका सा कृताघप्रचूर्णा । ।४

रणे मद्यमत्ता समन्दस्मितास्या
घटत्सङ्कटच्छब्दराशेर्विलासा ।
हटद्धाटकाभूषणाभूषिताङ्गी
सदा पातु देवी परा भद्रकाली । ।५

कलानाथवक्रीकृताभूषणाङ्गा
स्वशीर्षे सदालम्बितारालकेशी ।
दितेःपुत्ररुण्डाङ्गने नृत्यमत्ता
शिरःकन्दुकेनैः कृतानन्दकेलिः । ।६

महोलास्यसक्ता महालास्ययुद्धा

विचित्रौघ्वहस्या सदाम्भोरुहास्या ।
सखीभिः सुहल्लीसलास्ये ललन्ती
सदैवास्थिपुञ्जाद्रणे कालिकैका ।।७

महत्तत्त्वविन्यस्तमायाप्रपञ्चे
कृतानन्दलीलैकवृद्धाकुमारी ।
हसन्ती लसन्ती सदा शासयन्ती
जगत्पालयन्ती शिवा सा जयन्ती ।।८

सदाद्यन्तहीनां भजे कालिकाम्बां
परानन्दलीनां भजे कालिकाम्बाम् ।
लसन्मञ्जुरूपां भजे कालिकाम्बां
परब्रह्मरूपां भजे कालिकाम्बाम् ।। ९

श्मशानाख्यमञ्चे नटप्रेतसङ्गे
जगद्देवनव्यग्रबाला कृपालुः ।
परा योगनिद्रा विधीन्द्रादिवन्द्या
महादेवपाला सदा पातु काला ।।१०

कालिकाकालिकेति यो सकृद्वारं जपेद्यदि ।
मुक्तिस्तस्य करस्था च न तापत्रयबन्धनम् ।।११

ककारोऽस्ति विधाता च अकारोऽस्ति रमापतिः
लीकारो द्रावणे प्रोक्तः कालीतिनाम उच्यते ।।१२

काकारोस्ति महीवाच्यः लीकारो द्रावणे युतः ।
लीयते हि मही यस्यां सा कालीत्युच्यते सदा ।।१३

कालिके कालिके रक्ष मामिति यो वदेत् सदा ।
यमपाशोपि शक्तो न बन्धने तस्य सर्वदा ।। १४

दुष्कृतसत्कृतबन्धनहीनः
संसृतिसंस्थितिसंहृतिशक्तः
ओमितिवाचकमञ्जुलकाली-
नामपरायणसिद्धमहात्मा ।।१५

ककारः सृष्टिवाच्योक्तश्चाकारः स्थितिवाचकः

लीकारोस्ति लयः प्रोक्तः कालीत्योङ्कारसंज्ञकः।।१६
(लीकारोस्ति लयः प्रोक्तः सृष्टिस्थितिलयं बुधः)

जय कालि कपालिनि देवि शिवे
भुवि मोहनकारणहास्यमुखे।
सकलार्त्तिविनाशकमञ्जुपदे
भव शङ्करि मे शरणं शुभदे।।१७

हतामित्रवृन्दासिताङ्गा कपाली
चतुर्बाहुयुक्ता महेशैकरक्ता।
कदाचित्कृतं वाकृतं दोषवृन्दम्
पराकालिकैकैव मृद्गातु सर्वम्।।१८

ब्रुवे किं महिम्नस्त्वमेवाक्षरस्था
श्रुतीनां श्रुतिस्त्वं कथां किं शृणोमि।
न त्वं बुद्धिवेद्या कथं त्वां स्मरामि
सदैवं हि नामामृतं ते पिबामि।।१९

सुराशादिदेवाः पुरा ते महिम्नः
प्रमादेन विस्मृत्य मातर्बभूवुः।
अहङ्कारमत्तास्ततस्त्वं शिवानि
महायक्षरूपेण गर्व्वापहन्त्री।।२०

त्वया भारतीशो विधाता बभूव
त्वया मापतिः पालकः कालिकाम्बे।
त्वया शङ्करो विश्वसंहारकारी
त्वया देवि शक्रः सुरेशो बभूव।।२१

महाघोरदंष्ट्रां मदोन्मत्तभाषां
विशालारुणाक्षीं जटाबद्धमौलिम्।
ज्वलद्रुक्मभूषां सदादिग्वस्त्रयुक्तां
महेशस्यचित्ताधिरूढां भजामि ।।२२

जगत्यां सुखं कुत्र शान्तिश्च कुत्र?
सुधा कुत्र नित्या च कुत्रास्ति मुक्तिः
न पश्यामि कुत्रापि शास्त्रोक्तयोगं
भज त्वं स्मर त्वं पराकालिकैकाम्।।२३

कदा शान्तचित्तं कदा पूर्णवित्तं
कदा चित्तवृत्तेर्निरोधं समग्रम् ।
कदा म्लानभूता मनोजस्य बाणाः
भज त्वं स्मर त्वं पराकालिकैकाम् । ।२४

शिवार्धाङ्गधिष्ण्या श्मशाने गता या
सदा प्रेतपीठासने चित्रदेहा ।
महीध्रारिपीनस्तनद्वन्द्वयुक्ता
महाकालिका सा सदा मां प्रपातु । ।२५

ललज्जिह्वयालोहितस्रावधारा
वहन्ती सदा लोकसंहारकर्त्री ।
पराकालिकायाः समाघातभूमौ
भजस्वानिशं श्रीमहादेवजायाम् । ।२६

गता मे मतिर्भोर्गता प्राणशक्तिः
गतः शास्त्रबोधः गतश्चिन्निरोधः ।
गतं जीवनं मे गता भोगलक्ष्मीः
अतस्ते पदेहं गतोहं शरण्ये । ।२७

मदोन्मत्तहस्ती शिवे मे हि गर्व्वः
भव त्वं हि सिंही मनःकानने मे ।
न बोधं बलं चैव शक्नोमि नैव
गतिर्मे हि मत्यां भवत्वं भवानि । ।२८

पुरा दक्षगेहे सतीति प्रसिद्धा
स्वलीलार्थदेहा महीध्रेशकन्या ।
न लीलां हि जाने तवेशानजाये
भजे ते पदाम्भोजकं कादिमाये । ।२९

न जाने त्वदन्यं न माने त्वदन्यं
न जाने हि दुःखं न जाने च पापम् ।
शुभे दक्षिणे सन्ततं त्वां स्मरामि
पदाम्भोजभक्तिं प्रदेह्येवमेव । ।३०

वाङ्मनःकायसम्भूतपापानि मे

पीडयन्ति श्रयेहं पदं ते शिवे
कालपाशाभिबद्धोस्मि देवि सदा
दक्षिणाकालिके रक्ष मां सर्वदा । ।३१

सदा सन्मयी सत्स्वरूपे विकासा
सदा चिन्मयी चित्प्रकाशे विकाशा ।
सदानन्दमूलात्मतत्त्वे विलासा
सदा सच्चिदानन्दसद्ब्रह्मरूपा । ।३२

महाच्छास्त्रदावे हि मोहान्धकोहं
न हस्ते च दण्डो न मे मार्गबन्धुः ।
त्वमेवेश्वरी भूतसन्तापहन्त्री
सदा दक्षिणे देहि हस्तावलम्बम् । ।३३

महेशस्यकन्दर्पहृत्सङ्ज्वरस्य
भिषज्युग्मवक्षोजयुक्ता त्वमेव ।
महोग्लौकलामालिनी भीषणा
शवस्था पराकालिका पातु नित्यम् । ।३४

क्वचित्कुञ्चितास्रा क्वचिज्जूटिनी सा
क्वचिच्छ्वेतवर्णा क्वचित्सा च कृष्णा ।
क्वचिद्दिक्पटा च क्वचिच्छाटीवासा
क्वचित्कालिका सा क्वचिद्गौरीरूपा । ।३५

श्रुतिज्ञानबुद्धां श्रुतिव्यक्तगेयां
अविद्बुद्ध्यगम्यां च बौद्धैरगम्याम्
त्रयीवन्द्यकीर्तिं पृथग्ज्ञानशून्यां
भजेऽहं श्रितानन्दकल्पाद्रिनेत्राम् । ।३६

महाकालरामां क्वचिद्रामरामां
यशोदाजरामां हि वृन्दावने सा ।
क्वचिद्ब्रह्मरामां क्वचिद्विष्णुरामां
परब्रह्मरामां भजे कालिकाम्बाम् । ।३७

साधुसाधुवचनान्मृडेनपरितोषिता परमयोषिता
गुप्तभावविदिता भुवनपोषिता दनुजशोषिता ।
पीवरस्तनयुगा सुरेशमुकुटोज्ज्वलत्पदनखान्विता

शर्वनेत्रपुटमण्डलाकृतिसुदर्शिताऽवतु सदा सदा ।।३८

जपापुष्पमालां श्रितेभ्यो दधानां
गले दानवेभ्यो स्फुरन्मुण्डमालाम् ।
कपालीं करालीं च कारुण्यवारिं
भजे भद्रकालीं सदा मञ्जुवाणीम् ।।३९

महानीलरत्नाद्रिदेहामदेहां
महोल्लासहास्यान्वितास्यां सुलास्याम् ।
प्रपञ्चे कुलस्त्रीगलज्जामलज्जां
भजेऽहं श्रितोद्धारविज्ञामविज्ञाम् ।।४०

घोरखड्गकरां श्यामां कल्याणगुणशालिनीम् ।
स्मरेन्नरः पराकालीं विपरीतरतातुराम् ।। ४१

मुण्डिनीं खड्गिनीं कालीं वरदाभयहस्तिनीम्
शिवशवसमारूढां भजे कृष्णशरीरिणीम् ।। ४२

महाभोगयोगासनारूढपादां
कुलाख्यागमोपासनातुष्टचित्ताम् ।
मृगाङ्के रवौ मण्डले भासमानां
पराचित्स्वरूपां भजे कालिकैकाम् ।।४३

महादेवचिन्मानसैका मराली
अतिश्यामवर्णा विचित्रा कराली ।
सदा रक्षतात् श्रीमतीभद्रकाली
श्रुतिज्ञानक्षीराज्ञताम्भोविभेत्त्री ।।४४

वरं स्रावयन्तीमभीतिप्रदात्रीं
अहङ्कारमुण्डस्फुरद्धस्तपद्माम्
लसज्ज्ञानखड्गेन मोहं हरन्तीं
पराद्वैतवीरां भजे कालिकैकाम् ।।४५

भुवनस्रष्टृ वै तुण्डं मुण्डं क्षयोऽसि निग्रहः ।
वरमनुग्रहोऽभीतिः पालनं कालिकास्त्वकाः ।। ४६

कथयन्ति जनास्तव भीमवपुः

अतिघोरमिदं प्रतिघोरमिति ।
व्यभिचाररता प्रतिपापरताः
न हि बिभ्यति किं यमराजमुखात्? । ।४७

त्वमाद्या कुमारी त्रपा तर्हि कास्ति
त्वमेका जगद्व्यापिका के पटास्ते ।
विलीनाः समस्ताङ्गरङ्गा त्वयि स्म
तदा कृष्णवर्णासि मां पाहि कालि । । ४८

कालिके शवमालिके जय विष्टपेश्वरपालिके
कालिके विकरालिके जय चन्द्रचूडकृतालिके
कालिकेक्षसुमालिके जय भूधरेश्वरबालिके
कालिके जितपालिके जय विश्वशासनचालिके । ।४९

प्रमथेशप्रिया पातु मां सदा भवबन्धनात्
सा गतिर्मे शवारूढा योगभोगप्रदा शिवा । ।५०

न कालो न शक्रो न मेशो न भर्गो
न वेधाश्च शक्ताः ममोद्धारणे भोः ।
सशक्तासि शक्तिस्त्वमुद्धारणे मे
त्वमेकं भवाम्बे गतिर्मे गतिर्मे । ।५१

जपापुष्पमाला गले शोभमाना
युवावस्थयोन्नम्रवक्षोजयुग्मा ।
समाश्लिष्टशर्वोष्ठसच्चुम्बितास्या
हरप्रेमलीलानखक्षण्यमाना । ।५२

महेशोरसिस्थे द्रवासक्तनेत्रे
महामन्त्रदेहे महायन्त्रगेहे ।
कुलोपासकानां लसच्चित्तरत्ने
सहस्रारपद्मोल्लसत्पादुकेऽव । ।५३

कमलजकमलस्था शैलयोन्यङ्गभूता
हरिहरिकृतपीठा कामदा कामविद्या ।
शिवशवरमणे संसक्तचित्ताद्यविद्या
वृतनवतनुरूपा कामरूपे विलासा । ।५४

जगद्व्याप्तपाषण्डधर्मं भवानि
इहापश्य खड्गो न किं ते तृषार्त्तः।
जहि त्वं ह्यधर्मं सुधर्मं प्रपातु
श्रुतेस्तत्वबीजे सदाधर्महीने।।५५

ककारान्वितं रेफसेकारयुक्तं
अनुस्वारमूलं जपेद्वा सकृद्यः।
अशेषत्रयीमन्त्रकास्तस्य जिह्वा-
ख्यमञ्चे सुनृत्यन्ति नूनं मनुष्याः।।५६

कथं त्वं सती कान्तवक्षस्थपादा-
पि च त्वं कथं दारुणा चैव माता।
कथं कालिका गौरवर्णात्मिकापि
न वेदो हि वेद प्रभावं तवेदम्।। ५७

छञ्छञ्छञ्छञ्चछञ्छञ्चकचकचकचं नूपुराद्गुञ्जनादं
धिन्धिन्धिङ्कारधिन्धिन्तकतकतकधिं नृत्यतीशेनसङ्गम्।
साधो साधो वदन्ती गटगटगटगटका गूढमद्यं पिबन्ती
हाहाहाहाहहाहा हसति निजसखीभिश्श्मशानालये सा।५८

तत्तत्तत्तत्तडित्पातकडतकडतानादसंयुक्तभूषा
मातर्मातर्भवानीतिजपरटनरता ब्रह्मनारायणेशाः।
भुग्भुग्भुक्कारदीप्ता दहदहदहना सूर्यकोटिप्रकाशा
ज्वालामालात्यराला धनचिकुरयुता वाडवाग्निं दधाना।।५९

दिग्वस्त्रामाद्यविद्यां कुलपथमहिषीं मद्यसंरक्तनेत्रां
भक्तानां पापहन्त्रीं श्रितपरगतिदामज्ञतानाशविज्ञाम्।
वेदान्ते वेद्यतत्त्वां जितदनुजगणामद्भुतास्योक्तहास्यां
कालीं वन्दे करालीं कलिमलहरणीं श्यामवक्त्रां हर्षरूपाम् ।।६०

शवाकारपीठे सुमध्यस्थितायै
कलानाथपीयूषलिप्तस्तनायै।
मनःकायवाक्क्लेशनाशोत्सुकायै
नमः कालिकायै जपामालिकायै ।।६१

सकृद्वापि कालीसुनामामृतं यः
सकृत्कालिकाचित्रचारित्रगाथाम्।

न वाक्कर्णचित्तैः पिबेद्वानिशं वै
वृथा तस्य प्राणो वृथा तस्य जन्म । ।६२

कृताः कर्मबाणाः धृतं कायचापं
मृधे जीवने मे कुरुक्षेत्रभूमौ ।
सदा पार्थयन्त्री भव श्यामवर्णे
न शक्तोस्मि योद्धुं पराम्बे कदापि । ।६३

हसन्त्यट्टहासेन युद्धे भवानि
रिपुर्मौनधारी समक्षे दृशान्ते ।
विभुर्मारधारी रतस्तल्पपीठे
सुतेभ्यस्तु मुक्तिः करस्था तवाम्बे । ।६४

शिवानन्तकान्ते त्वमेकान्तकान्ते
खगानन्तकन्तेरधोब्जे निशान्ते ।
परामूलहन्ते मुखे स्थूलशान्ते
कृतान्तान्तकस्यैककान्ते प्रसीद । । ६५

कुतस्ते कृपाणो महासर्गकाले
कुतो मुण्डमाला यदित्वं सदैका ।
कुतस्ते स्वरूपं यदि त्वं ह्यरूपा
कुतस्ते ममत्वं महानाशकाले । ।६६

त्वमेव त्रयीज्ञानसम्भूतदेहा
पुराणोक्तनानाकथापात्ररूपा ।
त्वमेवागमे कौलतत्वप्रकाशा
परे शास्त्ररूपे प्रसीद प्रसीद । ।६७

श्मशानस्थसुस्थाणुवृक्षेऽभिलिप्ता
शिवेत्युक्तकल्पाख्यवल्ली विचित्रा ।
त्रयीसस्ययुक्ता घनश्यामवर्णा
महाभोगभङ्गी भजे तां भजे ताम् । ।६८

रक्तोपि देहे तव चन्दनं वै
मुण्डावलिश्चैव गलरत्नमाला ।
श्मशानभूः मन्दिरशोभमानं

किं ते महिम्नो विलिखामि देवि । ।६९

किमर्थेण किं वैष्णवेणैश्वरेण
किमैन्द्रेण किं मानवाद्यैः पदैश्च ।
सदानर्थकार्थेन भोग्येन किञ्च
मनःस्थं हि चेद्दक्षिणापादपद्मम् । ।७०

गते स्वप्नजाले सदा व्यर्थसौख्यं
गते पूर्वकाले सदा व्यर्थदुःखम् ।
तवाङ्घ्रौ गतानां महेशस्यजाये
सुखं नैव दुःखं भविष्यत्यजस्रम् । ।७१

कल्याणीं गुणशालिनीं भगवतीं स्थाणोः शवोपस्थितां
खण्डेन्दुपरिभूषिताग्रभरणां कालीं जपामालिकाम् ।
प्रेतक्ष्मानटनातुरां शितिवपुर्घोराट्टहासान्वितां
वन्दे मूर्तिमशेषकारणपरां श्रीदक्षिणाकालिकाम् । । ७२

महावाक्यतात्पर्यमद्यं पिबन्ती
सुवैराग्यभूतश्मशाने वसन्ती ।
सदा ज्ञानखड्गं करे धारयन्ती
महेशप्रिया हृद्यपद्मे लसन्ती । ।७३

सदा कालिके त्वां धियां चिन्तयामि
कदा ते मनोज्ञस्वरूपं हृदिस्थम्
मया नेत्रमार्गे प्रदृष्टं भवानि
कदानन्ददावे चरामि चरामि । ।७४

ममक्लेशदोषाः ह्यनन्ताः शिवे कान्
वदाम्येकतुण्डात् कथं चैव देवि ।
कृताघोपि नाहं कृताघाद्विरक्तः
अहो दक्षिणे त्वां कथं संस्मरामि । ।७५

महानन्दमन्दाकिनीवारिधारा-
भिषिक्ता शिवानन्दकन्दा त्वमेव
समुद्रे स्थितो वाडवाग्नेः समाना
विचित्रस्वरूपावृता तत्त्वशक्तिः । ।७६

सुराणां नराणां च विद्याधराणां
पिशाचासुराणामृषीणां बुधानाम्
सदा भैरवाणां खगानां च भानां
त्वमाधारभूता सदा चेतनानाम् ।।७७

भवस्यैकहार्दज्वरातङ्कहन्त्री
त्वमेका भवाख्यज्वरं चैव हन्त्री
महामोहरोगव्यथाबाधितोहं
श्मशास्थवैद्ये सदा पाहि मां त्वम्॥ ७८

कलानाथचूडे रमानाथवन्द्ये
स्वनाथोपरिस्थे ह्यनाथैकनाथे
सुरेशात्मजानाथशक्तिप्रदात्रि
जगन्नाथनाथे भवात् पाहि नित्यम्॥ ७९

त्वमेकासि माता त्वमेकासि धाता
त्वमेकासि देवः सदा मित्रमेव
हिरण्यानि सर्व्वाणि मे वैभवानि
कथं विस्मरामि त्वमेकां भवानि॥ ८०

कालिके ते पदद्वन्द्वं मनसा कर्मणा गिरा
भजे नित्यमहं देवि तदन्यान्न गतिर्मम॥ ८१

सदा कालिकाकालिकाकालिकेति
मुदा ये जपन्ति स्मरन्ति ह्यजस्रम्।
न तस्याश्रयः कोपि देवि त्वदन्यः
स लोकाश्रयो वै इतो नैव शङ्का।।८२

पराभक्तिरेका हृदागारमध्ये
सतीस्त्रीसमाना वसन्ती हि यस्य।
पुरे श्रीश्च मुक्तिः पराख्या सुलभ्या
विधीशाच्युताः पाददासाः हि तस्य।।८३

सुभक्तिस्तवात्रेर्वधूर्वै सती सा
पुरो वै पुरश्च त्रिदेवाः हि तस्याः
सुखज्ञानवैराग्यसंज्ञाः कुमाराः
सुदत्तस्तु मुक्तिर्हि विष्णोःपदाख्या ।।८४

भवाद्भव्यभावाद्विषादोक्तभावाद्
भवान्तर्विजाले भवत्पाशबद्धः।
न भावो न भावो न भावोस्मि मात-
र्भवत्या भवे भावये त्वां भवानि।।८५

कलेर्वाहिनीचक्रसमव्यूहमध्ये
बहिर्मार्ग न ज्ञो यथैवाभिमन्युः।
विना कोपि शस्त्रेण मृत्युप्रभीतः
त्वं रक्ष मां कालिके भीमरूपे ।।८६

कपाली विषादी विवस्त्रः पतिस्ते
कदाचारमग्नो रणेऽनङ्गमग्नः।
सदा निर्गुणः क्रोधमत्तश्च भिक्षुः
तदापि त्वमेका सती चैव तस्मै।।८७

यथा भोजनान्ते जलात्तृप्तचित्तं
तथा वासरान्तेर्चया तृप्तचित्तम्।
तवाम्बे कथं सन्ततं त्वां स्मरामि
सदा मानसे मे त्वमेकं भजामि।।८८

कथं देवि कृष्णासि चेत् स्वप्रकाशा
तमोऽज्ञानहन्त्री महाज्ञानसूर्या।
कथं त्वं श्मशानालया चेच्छिवाख्या
विवादोत्सवं ज्ञेषु देवेषु चेत्थम्।।८९

नमो दक्षिणायै परायै शिवायै
महाकालिकायै भवानन्ददायै।
महेशाच्युतब्रह्मशक्रैर्नुतायै
शवासीनरुच्याङ्घ्रियुग्माम्बुजायै।।९०

महेशस्मिताम्भोजपत्रान्मुखाब्जे
स्मिताम्भोजवैरात् कृतद्वन्द्वयुद्धा।
रसज्ञाद्विदन्ते कृतारूढदन्ता
द्विजास्तैश्शिवं सर्वदा पीडयन्ती।।९१

महामूलपद्मोत्थिता सञ्ज्वलन्ती

महाभोगकाले सुधां भक्षयन्ती
महाब्जात्सुधां साधके वर्षयन्ती
महाकालवामे सदा वर्चयन्ती ।।९२

नमस्ते महाविद्ययावृत्तरूपे
नमस्ते महामोहसंहारिकायै।
नमस्ते हरानन्दसन्दोहिकायै
नमस्ते नमस्ते महाकालजायै।।९३

वशीकृत्यकृत्याकृतस्तम्भनादीन्
मनोमोहनोच्चाटनान् भूतबाधान्।
पिशाचादिदोषान् हर त्वं भवानि
समस्तप्रयोगैकमूले नमस्ते॥ ९४

लोकगिराकृतशाबरमन्त्रा
दागमनैगमकृत्यकुजालात्।
मारणमोहनवश्यकृतेश्च
मामभिरक्षय पीडितमम्बे॥ ९५

न जानाति विष्णुर्न चैवं हि जिष्णुः
न जानाति शम्भुश्च नैवं हि शम्भुः।
न जानाति कोऽपीह संसारजाले
तवैव प्रभावं महामुण्डमाले ।।९६

धनं पुत्रपौत्रादिसौख्यं च भोगं
यशश्चारुगेहं तथा नाकगेहम्।
मनोऽभीष्टवस्तुं पदं चैव जिष्णोः
प्रदेहि त्वमेवादिविद्या भवानि ।।९७

महाज्ञानपीयूषसिन्धौ हरिस्त्वं
सुशृङ्गारकैलासशृङ्गे हरस्त्वम्।
वेदान्तपद्मासने ब्रह्मरूपा
त्वमेवाम्बिके सर्वलोकाश्रयासि ।।९८

महासर्गकालेऽतिमाधुर्यलास्या
महाताण्डवं हि क्षये चैव यस्याः।
जगन्मञ्जुलीलाकृतेः सूत्रधारी

हृदा सर्वदा वै नटीं तं भजामि ।। ९९

न वेदानुरक्तः न शास्त्रार्थविज्ञः
न चैवाग्रजोस्मि प्रमादानुसक्तः।
न जानामि भक्तिं शिवे ते पदस्य
त्वमेवाम्ब मे देहि हस्तावलम्बम्।।१००

क्षमस्व क्षमस्व क्षमस्वापराधं
प्रदेहि प्रदेहि प्रदेहि प्रमोदम्
यस्मात् सदा ते पदं संस्मरामि
महादुःखजालं सदाऽहं त्यजामि।।१०१

न मे काव्यशक्तिर्न मे हस्तकेलिः
न चित्ते हि भक्तिर्न मे योगसिद्धिः।
परं केवलं ते पदे मेऽनुरक्तिः
अहो सापि नीचा भवानि क्षमस्व ।।१०२

क्व तव महिमानः क्व प्राकृतप्रतिभा मम।
क्व तव पादपद्मौ क्व शाब्दजालं मयाकृतम्।।१०३

जगल्लीलाऽलिकेरेखाविलासस्तव कालिके।
बालिके गिरिराजस्य त्वं मम शरणं भव।।१०४

त्रिदशानां यथा शक्रः सूरतनां शिवो यथा
तथैव सर्वलोकानां पदानां कालिकापदम्॥ १०५

यद्यन्मानसचेष्टासु दुष्टचेष्टागता यदि।
तन्मानसापराधं मे क्षमस्व जगदम्बिके।। १०६

सम्भवोऽपूर्णशब्दाः मे क्वचित्काव्यस्य दूषणाः
किन्तु नापूर्णभावो मे एतज्जानामि निश्चितम्

कालीकालीतिकालीति नामानि ये जपन्ति वै
ते सदा मनसा वाचा वा धन्यास्ते हि भूतले

॥ दक्षिणाकालिकायै नमः॥